Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SHISRRJ | Volume 1 | Issue 4 | ISSN : 2581- 6306

# धातवसाधने भोजनसमीक्षा



डॉ. मनोज कुमार मिश्र
ग्राम व पोष्ट–जयदेवपट्टी,
थाना–घनश्यामपुर,
दरभंगा, बिहार, भारत।

**सरांशः –**_सकलश्रुतिस्मृतिपुराणेतिहासश्रौतसूत्रगृह्यसूत्रधर्मसूत्रकाव्यशास्त्रनीतिशास्त्र तिशास्त्रेषु कर्मकाण्डगतपात्राणां कर्मसम्पादकसाधनानाञ्च चर्चा प्रशंसा फलश्रुतिरस्ति। दर्शनग्रन्थेष्वपि एतादृशी चर्चा प्रशंसा च दृश्यते। सम्पूर्ण मीमांसादर्शन कर्मकाण्डमाश्रित्यैव प्रवर्तते । अत एव मया कर्मकाण्डाचार्यपरीक्षां समुत्तीर्य चिन्तितं यत कथन्न कर्मकाण्डगतसाधनानां कुश पुष्प गोमयासन पञ्चगव्य पञ्चामृताग्निस्रुव मुक्स्फ्योपयभनोगुष्ठीत्रिकुशमोटकप्रभृतीनां लक्षणनिर्माणोपयोगानां समीक्षणम् कार्यम् । यतोऽधुना सर्वत्रैव भौतिकवादेजना अस्तव्यस्ता समयासौकुर्ययक्ताः सन्ति। एत एव येन केनापि विधिना साधनसहकारित्वेन विवाहोपनयन मुण्डन नामकरणान्नप्राशनप्रभृतीनि कार्याणि सम्पादयन्ति ।

**मुख्यशब्दः** –भोजनम् कर्मकाण्डः पंचगव्य धातवसाधनम् मीमांसादर्शन धातुविचारम् धातुः।

---

प्रथमं तावत् धातवसाधनशब्देन धातुविचारं कृत्वा पश्चात् भोजन समीक्ष्येत। धातुस्तावत् दधातेः धा धातोः तुन्प्रत्यये सति धातुशब्दः। स च धातुरनेक विधानार्मर्थानां वाचकः। एकस्तु क्रियावाची भूवादयो धातवः। द्वितीयः शरीरस्थो धातुः रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि' एतान्यपि धातुपदवाच्यानि भवान्ते। किन्तु अस्माकं शोध विषये अनयोभिन्नो धातुः स च स्वर्णादौ वर्तते। स्वर्णादिश्चाष्टविधः। तद्यथा

हिरण्यं रजतं कांस्यं ताम्र सीसकमेव च ।
रंगमायसरैत्यं च धातवोष्टौ प्रकीर्तिताः ।।

इति दान सागरः

अन्यच्च

सुवर्ण रजतं तानं लौह काप्यञ्च पारदम् ।
रंगं च सीसकञ्चैव इत्यष्टौ दैवसम्भवाः ।

इति वैद्यकम्

अन्यत्र पुन: सप्तैवधातव:

**स्वर्ण रूप्यं च तानं च रंगमायसमेव च।**

**सीसं लोहं च सप्तैते धातवो गिरिसम्भवा: ।।"**

तत्र प्रथम दानसागरनुसारेण धातव: अष्टो सन्ति, यथा– हिरण्यम रजतम्, ताम्रम्, कांस्यम्, सीसम्, रङ्म, आयसम, रैत्यम् इति। तत्र रैत्यम पित्तलम् । तेभ्यो बहुभ्यो धातुभ्यो जीवनोपयुक्तानि पात्राणि भवन्ति । तेष्वपि पात्रेषु बहूनि पचनपात्राणि अन्नादिस्थापनपात्राणि भोजन पात्राणि जलदुग्धादि पानपात्राणि च भवन्ति। यद्यपि पात्रशब्द: स्थापनाद्यर्थको नास्ति तथापि पात्रमिव पात्रोपचारात् तान्यपि पात्राण्येव भवन्ति। पात्रंतु पाधातो:''ष्ट्रन प्रत्यये सति पात्रशब्द: पीयते अनेन साधनेन तत्साधनं पात्रम् । तदुपचारात् भोजनादिपात्रमपि सिद्धयति। तानि च पात्राणि यथा– तण्डुलपाकपात्रम्, दर्वीपात्रम् द्विदलपाकपात्रम्, व्यञ्जन पाकपात्रम्, पिष्टपचनपात्रम् ऋजीषम्, स्थालीपात्रम्, द्विदलभोजनपात्रम् (बाटी) जलपात्रम् कमण्डलु पात्रम्, जलाहभरणपात्रम् (वाल्टी) फटाहीपात्रम् (केड़ाही) कटाहपात्रम् (कड़ाह) तप्तिकापत्रम् (तषा), वृहत्रथालीपात्रम् परात: 1 घट: कलश: ओदनपरिवेषण (अढ़िया) श्रृंगारकम्, पतद्‌ग्रह: (पीकदान)। इत्येव पात्राणि उच्यन्ते । तथा हि दर्शपूर्णमासप्रसंगे शतपथब्राह्मणे –'स वा अनस एव गृहणीयात् । अनो ह वा अग्रे पश्चेद वा इदं यच्छालम स यदेवाग्रे तत्कारवाणी इति तस्माद एव गृह्णीयात भूमा वा अन:।

भूमा हि वा अनस्तस्याधदा बहु भवति अनोवाह्यम भूत्याहुस्तदमानमेवैर तत यदपैति तस्मादनस एव गृह्णीयात्। यज्ञो वा अन: । यज्ञो हि वा अनस्तत्मादनस एव यजूंषि सन्ति न कौष्ठस्य न कुंभ्यै नभ्स्त्रायै एवञ्च पानपात्रमिव अन्यान्यपि भोजनादिपात्राणि कथ्यन्ते एवमेव वेदेष्वपि यज्ञपात्राणि भवन्ति । तथा हि 'द्वन्द्वं पात्राण्युतदाहरति –शूपं चाग्निहोत्रहवणीं च 'स्पयं च कपालानि च । शम्यां च कृष्णाजिनं च । उलूखलमुसले । दृषदुपले । तदृश।" इत्थं शतपथे द्वन्द्वं कृत्वा दश पात्राणि आसदयति । एवमेवाग्रे 'अथ यज्ञपात्राणि प्रोक्षति । दैव्याय कर्मणे शुन्धध्वं देव यज्यायै इति दैव्याय हि कर्मणे शुन्धति देव यज्यायै यदवोऽशुद्धा: पराजघ्नुरिदं वस्तच्छुन्धामि तत्र आज्यस्थालीप्रसंगे आह

आज्यस्थाली तैजसी वा मृण्मयी वा प्रकीर्तिता: द्वादशंगुलविस्तीर्णा प्रादेशोच्चा शुभास्मृता।। आज्यस्थालीसमानैव चरूस्थाली समानत: ।।

पुरोडाशस्य पात्री तु चतुरस्रा समानत: ।।

खातेन वर्तुलेनैव युत: यज्ञे प्रशस्यते ।

अथास्मिन्नेवप्रसंगे भोजन पात्रविचार: प्रस्तूयते – यथा

सौवणे भाजने चैव त्रिरात्रं फलमश्नुते ।।

पालाशपद्मपत्रेषु गृही भोजनमाचरेत् ।

पैठीनसि:

ब्रह्मपत्रेषु वो भुंक्ते मासमेकं निरन्तरम।

चान्द्रायणसमं पुण्यं कृतस्यापि चतुर्गुणम्

तत्र भोजनपात्राणि सौवर्णानि, राजतानि, ताम्रनिर्मितानि, कांस्यानि रैत्यानि (पैत्तलानि), आयसानि मृण्मयानि च भवन्ति। तेषु मृण्मयानां विचारस्तु उपेक्षणीय, यतो हि तेषां धातुत्वाभावात् । अथ च भोजनपात्राणि पर्णमयान्यपि भवन्ति । येषु पात्रेणु भोजनस्य प्राशस्त्यमस्ति। किन्तु केषु चित् पात्रेषु भोजनस्य निषेधोऽपि शास्त्रीयोऽस्ति ।

तथाहि –व्यास:

मृण्मये पर्णपृष्ठेवा आयसे ताम्रभाजने ।
नाश्नीयादपिचेद् भुंक्ते नरकं सोधिगच्छति ।।

एतेन मृणमयपात्रे नाशितव्यम् तथा पर्णानां पृष्ठभागेऽपि नाशितव्यम्, ताम्रपात्रेऽपि नाशितव्यम्, आयसपात्रेऽपि नाशितव्यम् । यदिचेत् तेषु पात्रेषु भुञ्जान: अपि प्रमादवशात् तथापि तद् भोजनं त्याज्यम् । अपि च वटार्काश्वत्थ पत्रेषु कुम्भीतिन्दुकजेषु च । श्रीकामो नतु मुंजीत कोविदारकरजयो:

एवं च

ताम्बूलाभ्यन्जने चैव कांस्यपात्रे च भोजनम।
यतिश्च ब्रहाचारी च विधवा च विवर्जयेत्।।

अत्रि:

आयसेन तु पात्रेण यदन्नमुपदीयते ।
तदन्नमपवित्रं स्यात् त्याज्यं वे सर्वकर्मणि ।।

एतत्प्रमानानुसारेण यति: ब्रह्मचारी विधवा च कांस्य पात्रे न भुर्जीरन् तेषां तत्र भोजने दोषश्रवणात् । तत्रापि ताम्र पात्रे गव्यं दुग्धादिकं कथमपि न भोक्तव्यम् ।

तथा हि

'गव्यं च ताम्रपात्रस्थं मघतुल्य घृर्त विव्ना
किन्तु जलपाने कानिचित् पात्राणि विशेषरूपेण विहितानि

यथा

कांस्यरजतपात्रस्थं तोयं नद्याश्च वर्धनम् ।
मूत्रवृद्धिकरं वीर्यक्षयकारी विबर्जयेत् ।।
ताम्राय: स्वर्णसीसानां पात्रस्थं फलचर्मणो: ।
शुक्रवृद्धिकरं तोयं तदुपासीत यत्नत: ।।

एवंच शिलाभाजनेऽपि भोजनं न कर्तव्यम् । तथा हि–

करे कर्पटके चैव शिलायां त्वदृभाजने।
भिन्नकांस्ये च वस्त्रे च मुक्त्वा चान्द्रायणं चदेत् ।।
सुवर्णारिपात्राणां शुद्धिप्रकारोऽपि धर्मशास्त्रे दृश्यते
सुवर्णरूप्यशंखमशुक्ति रत्नमयानि च । कांस्यायरताम्ररेत्यानि त्रपुसीसमयानि च ।
निर्लेपानि च शुध्यन्ति केवलेनोदकेन तु ।। शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लबकारिभिः ।
सूतिकाशवविणमूत्ररजस्वलाहतानि च ।
प्रक्षेप्तव्यानि तान्यग्नौ यच्च यावत्सहेदपि।।

अत्र अश्म प्रस्थरम्, अयोलौहम्, रीतिः पितलम्, तद्घटितपात्रम् रैत्यम्, त्रपु रंगम्, निर्लेपम् अनुपहतम्, उच्छिष्टानि उच्छिष्टस्पृष्टानि, उच्छिष्टे शंखवचनेन शुध्यन्तस्य प्रतिपाद्यमानत्वात् क्षारो भस्म, अम्लवारिभिः जम्वीरादिरसैः तत्र क्षारं कांस्यादो, अम्लोदकं ताम्रादौ । अतएव शंखः–

उष्णोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा।
क्षारेण शुद्धिः कांस्यस्य लौहस्य च विनिर्दिशेत् ।।

बौधायनोऽपि–
तैजसानां तु पात्राणामुच्छिष्टोपहतानां त्रिःसप्तकृत्वः परिमार्जनम्,

परिमार्जनं मृदगोमयभस्माभिरिति। मूत्रपुरीषरेतः प्रभृत्युपहतानां पुनः करणं गोमूत्रे वा सप्तरात्र संस्थाप्य पूर्ववत् मार्जनम्।शतातपश्च–

गवाघ्रातेषु कांस्येषु शूद्रोच्छिष्टेष्सु वा पुनः।
दशभिर्भस्मभिः शुद्धिः श्वकाकोपहतेषु च ।।

अंगिराश्च–

गण्डूलं पादशौचं च यः कुर्यात्कांस्य भाजने ।
भूमौ निःक्षिप्य षण्मासान पुनराकारमादिशेत् ।।
आकरमादिशेत् वहनी क्षिपेत् ।

**सन्दर्भग्रन्थ**

1.निरूक्तम्, मुकुन्द झा बख्सी,चौखम्वा विद्याभवन वाराणसी
2.श. च. वेद संहिता महीधर भाष्य–जगदीशलाल शास्त्रीमोतीलाल वनारसी दक्ष य–का. सि.सं.8. वि. वि. प्रकाशन, गीता प्रेस
3.श्रीमद्भागवत महापुराण
4.श्री यद्देव भागवत महर पुराण
5.भारतीय कर्मस्वरूपा ध्ययनम्, गीता प्रेस ,सम्पूर्णानन्द सं0 वि.पि. प्रकाशन
6.पितृकर्म निर्णय:,त्रिलोकनाथ मिश्र,चौखम्वा विद्याभवन वाराणसी
7.शास्त्रीदीपिका पार्थ सारार्थ मिश्र चौखम्वा विद्याभवन वाराणसी
8.यजुर्वेद ,रामशर्मा शान्तिकुंज हरिद्वार
9.वाजसनेय प्रातिशाख्यम् ,वीरेन्द्र कुमार ,चौखम्बा संस्कृत प्रतिष्ठान
10.शु0 च0 वेदसंहिता ,विधेश्वर मिश्र ,कला प्रकाशन वाराणसी
11.वैदिक समाज और आचार विचार समीक्षा ,विधेश्वर झाकला ,प्रकाशन वाराणसी
मान्यता प्रकाशन दिल्ली
12.यजुर्विधानसूत्रम्, रमेशचन्द्र दास ,संइराज श्री कृष्णदास बम्बई
13.दुर्गोपासन कल्प डुमाध्याय ,हरिकृष्ण शर्मा ,चौखम्बा प्रकाशन
14.कारतीय श्रौतसूत्र देवयाज्ञिक पद्धति